नं. ५२६१

ना. अग्नि ब्राह्मणं

क.

पत्र. ३ सं. १९६५

विष. संहिता ब्राह्मणं

𑆃𑆓𑇀𑆤𑆴𑆧𑇀𑆫𑆳𑆲𑇀𑆩𑆟𑆩𑇀

𑆥𑆠𑇀𑆫𑆳

त्रवाडि सर्वेश्वर समुत्र निपोथि छ

॥त्रिपाठीयज्ञेश्वरस्येदंपुस्तकम्॥

॥वडनगरा काशि त्रवाडी सर्वेश्वर पुत्र त्रवाडी ... विष्णु ... स्वरे पोथी आ ग्री ...
॥ ... हिता उ ... शद ... वं ... दावादि त्रवाडि मुलन
॥ ... पुत्र त्रवाडी वेजनाथ ने ... आपी स्व ... नाकारसी
सुदी ... रवौ पत्र ॥१६॥

॥ श्रीगणेशाय नमः ॥ ॐ हरिः ॥ ॥ अग्निरिंद्रः प्रजापतिः सोमो वरुणस्त्वष्टांगिरसः पू
षा सरस्वतींद्राग्नी इडानिधनानि पदनिधनानि अकारनिधनानीत्याग्नेयानि सर्वाणि
निधनवंत्यैंद्राण्यन्यान्यादिष्टेभ्यः सर्वाणि स्वाराणि प्राजापत्यानि यथा वामदेव्यं [illegible]क्ष
माणि सोमानि यथौशनकावे वाङ्निधनानि वारुणानि यथा यज्ञायज्ञीयमस्वरान्तु
स्वाराणि त्वाष्ट्राणि यथा वारवंतीयं चाभीवर्त्तश्च स्वः पृष्ठान्यांगिरसानि स्वातिभ्र
नानि पौष्णानि कयानश्चित्र आभुवदापवस्वसहस्रिणमिति वाङ्निधनं सारस्वतैं
यं कानयस्य यावत इत्यैंद्राग्नेस्तुतं रयिष्ठाः सहोरयिष्ठा इत्याग्नेयैंद्रे वसवो रुद्रा आ
दित्या विश्वेदेवा इति वसूनां स्वाराणि रुद्राणां निधनवंत्यादित्यानामैडानि विश्वेषां
देवानां वाङ्निधनानि याप्याभूयस्त्वेन प्रदेशा वर्त्तंत इत्यं न राण्यथांतराणि सर्वाणि
त्वाग्नेयानि सर्वाण्यैंद्राणि सर्वाणि प्राजापत्यानि सामानीत्यं नरतराण्यथांतरतमा रामः
नि सर्वाणि ब्राह्मणानि सामानीति सर्वान्तरतमान्यथोपनिषदृग्वेमातासामपिताऽऽज्ञ ॥

२ बंधुमानं

पतिः स्वरस्तथान्यूङ्खा ऽपाख्यायंते मारुतस्तान्याख्यायंते पयांसि सामत ऽपाख्यायंते
विरूपस्तान्याख्यायंते पयांसि स्वरत ऽपाख्यायंते प्रजापतिस्तान्याख्यायंते स वा एष
उद्गीथो बन्धुमान् बन्धुमत्यो बन्धुमत्यो भवति जानंति ह वा एनं पितरस्तु मानुषास्तु य ए
वं वेद ॥१॥ ॥ऽथ प्रातश्छंदसां वर्णाः शुक्ला गायत्र्या रूपेण सारंग ऽ रूपमुष्णिहः [illegible]
पिशंगं ककुभा ऽ रूपं कृष्णमानुष्टुभं ततः ॥ लोहितं बृहतीनां नीलं पाङ्क्तं ततः पुनः ॥
सुवर्णं त्रिष्टुभा ऽ रूपं गौरं जागतमुच्यते ॥ ऽतो यान्यन्यानि छंदांसि श्यावं तेषां ततः
पुनः ॥ नकुलं त्वेकपदानां द्विपदां बभ्रुरुच्यते ॥ सारंगशुक्लकृष्णसरूपाण्यपरपङ्क्तीः स
मत्राह्मणान्विताः ॥ ये यज्ञेषु प्रयोक्तव्यास्ते वर्णा दैवतउच्यते ॥ विराजः [illegible] यो विद्या
द्वैवर्णं ततउत्तरं ॥ ऽग्ने गायत्र्या भवत्सयुग्वा ऽसिरह्या सविता संबभूव ॥ ऽनुष्टुभा
सोमउक्थैर्महस्वान् बृहस्पते बृहती वाचमावत् ॥ विराण्मित्रावरुणयोरभिश्रीरिंद्र
स्य त्रिष्टुबिह भागो ऽह्नः ॥ विश्वान् देवान् जगत्याविवेश तेन चाक्ॢप्र [illegible] ऋषयो मनुष्याः ॥

॥ऽपुचमि०॥ आजापत्याः इति छंदसो वि छंदसो वायुर्देवताः॥ पुरुषो द्विपदानां देवतं ब्राह्मणं एक
पदाः स्मृताः॥ वासवी पङ्क्तिः खलु न मन्येते तद्दैवत्याः एवैतेषु छंदःस्था चो भवंतीति
छंदसां मुहे तद्दैवतं॥२॥ ॥ऽ१ यास्को निर्वचनं गायत्री गायतेः स्तुतिकर्मणो गायतो
मुखादुदपतदिति हि ब्राह्मणमुष्णिगुत्स्नाता स्निह्यतेर्वा कांतिकर्मणो वोष्णी
षिणीत्यौपमिकं ककुप्ककुद्रूपिणीत्यौपमिकं ककु[illegible] कुब्जश्च कुजतेर्वोब्जतेर्वा
नुष्टुबनुष्टोभनादन्वस्तोभदिति हि ब्राह्मणं पिपीलिका पिपलतेर्गतिकर्मणः पिपीलि
कमध्येत्यौपमिकं बृहती बृंहतेर्वृद्धिकर्मणो विराड् विराजनाद्विराधना
द्वा पङ्क्तिः पंचिनी पंचपदा त्रिष्टुप्स्तोभत्युत्तरपदा का तु त्रिता स्यात् तीर्णतमं छं
दो भवतीति त्रिवृद्वज्रस्तस्य स्तोभनीति वेत्यौपमिकं जगती गततमं छंदो जलचरग
तिर्वा क्षिप्रगतिर्जल्गल्यमानोऽसृजतेति हि ब्राह्मणमतिछंदस छंदे रथे छंदांसि तम
छदयतीति वा निचृन्निपूर्वस्य चृतेर्भरणादित्युच्यते यास्को गायत्रमाग्नेयं भवती॥२॥
स्या भवति देवानां वर्णीतं वा परमेष्ठिनो वा प्राजापत्यस्य साम सावित्रीं जेयं पत्रा

गायत्री ॥ गीतं ॥ तत्सवितुर्वरेणियोम ॥ ...दिवस्य धीमाहा इ धियोयोनः प्रचो२२२हुं ॥फा२२स्वाहा ॥
॥फा२२४५॥ क्रोधी लं विषयज्ञोपः शरीराद्विमुच्यते ॥ प्रतीत्य तम सम्यार ० स्वर्गलोके म
हीयते ॥ सहस्रयुगपर्यंतमहर्ब्रह्मणो पदमुच्यते ॥ नाकस्य पृष्ठे तं कालं दिवि सूर्य इवरोचते
॥ ततः कृतयुगस्यादौ ब्रह्मपूतो महायशाः ॥ सर्वज्ञो धृतिमान्नबिः पुनराजायते स्मरं नि
ति स्मरं निति ॥३॥ ॥ अथ सावित्र्यं गानिव्याख्यास्यामः शिरो ब्रह्मा ललाटं द्यौ श्चंद्रा
दित्यौ चक्षुषी मुखमग्निर्जिह्वा सरस्वती ग्रीवा वसव श्वरुद्राश्च बाहू उरो वायुः
पृष्ठमिंद्रो विष्णुर्नाभिः प्रजापतिर्जघनमूरू मरुतो वेदाः पादौ स्मितं विद्युद्भ्रू सितं वा
युरस्थीनि पर्वताः समुद्रा वासा ० सि नक्षत्राण्यलंकारा एवं वेद दुष्टु तादुरूपयुक्तान्यू
नाधिकाचसर्वस्मात्स्वस्ति देवरू बिभ्यश्च ब्रह्म सत्यं च पातु मामिति ब्रह्म सत्यं च पातु
मामिति ॥ ॥४॥ ॥ इति अग्निआत्लण समाप्तः ॥ ॥ स्वस्ति संवत् १६७५ वर्षे मार्गशि
र वदि १ सोमे लिखितं ॥ ॥ व्या० विश्वनाथसुतगोपालेन लिखितं ॥ शुभं भवतु ॥ ॥ ...
॥ ॥ ॥ श्री ॥ ॥ ॥ ॥ श्री ॥ ॥ ॥

श्लो० ८

अग्निज्वालस्तो. ५०